# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-३ | **प्रश्नपत्रम् – ५** | गुणाः – १०० |
| विषयः – साहित्यशास्त्रम् | ---- | समयः - ११ तः २ |
| दिनाङ्कः – २२/४/२०१६ | सन्दर्भग्रन्थः – साहित्यदर्पण (१ तः ३ परिच्छेदाः) | |

| | **साहित्यदर्पणप्रश्नाः** | |
|---|---|---|
| **प्रश्नः -१** | **कयोश्चिद् द्वयोः कारिकयोः ससन्दर्भं व्याख्यानं कुरुत ।** | १० |
| | (१) वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः ।<br>उत्कर्षहेतवः प्रोक्ताः गुणालङ्काररीतयः ॥<br>(२) मुख्यार्थबाधे तद्युक्तौ, ययाऽन्योऽर्थः प्रतीयते ।<br>रूढेः प्रयोजनाद्वाऽसौ,लक्षणाशक्तिरर्पिता ॥<br>(३) अर्पणं स्वस्य वाक्यार्थे, परस्यान्वयसिद्धये ।<br>उपलक्षनहेतुत्वा देषा लक्षणलक्षणा ॥<br>(४) विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः ।<br>सा वृत्तिर्व्यञ्जना नाम, शब्दस्यार्थादिकस्य च ॥<br>(५) विभावे नानुभावेन व्यक्तः संचारिणा तथा ।<br>रसतामेति रत्यादिः, स्थायिभावः सचेतसाम् ॥ | |
| **प्रश्नः -२** | प्रयोजनपूर्वकं ग्रन्थ कर्तुः परिचयः लिखत ।<br>अथवा<br>मङ्गलाचरणस्य प्रकारं दर्शयित्वा कवेः भावः विस्तारेण लिखत । | १५ |
| **प्रश्नः -३** | **एकस्य सविस्तरं उत्तरं लिखत ।** | १० |
| | (१) विश्वनाथकृतं काव्यलक्षणं विलिख्य तत्कृतमम्मटकव्यलक्षणखण्डनं सविस्तरं सोदाहरणं प्रतिपादयत ।<br>(२) लक्षणाशक्तेः लक्षणं विलिख्य तस्याः भेदाः सोदाहरणं लिखत । | |
| **प्रश्नः – ४** | **टिप्पणीद्वयं लिखत ।** | १० |
| | (१) सारोपालक्षणा ।<br>(२) आर्थीव्यञ्जना ।<br>(३) शाब्दीव्यञ्जना ।<br>(४) तिस्रः शब्दशक्तयः ।<br>(५) रसस्वरूपम् । | |
| **प्रश्नः -५** | **पञ्चलघूत्तर प्रश्नानां एकवाक्येन उत्तरं लिखन्तु ।** | ०५ |
| | (१) किं नाम काव्यम् ?<br>(२) किं नाम वाक्यम् ?<br>(३) संकेतः केषु गृह्यते ?<br>(४) अर्थः कतिविधः ?<br>(५) लक्ष्यार्थः कया वृत्यां ज्ञायते ? | |

| | | |
|---|---|---|
| | (६) "गंगायां घोषः" इत्यत्र किं प्रयोजनम् ?<br>(७) "कलिङ्ग साहसिकः" इति कस्य उदाहरणम् ?<br>(८) "कुन्ताः प्रविशन्ति" अत्र का लक्षणा ? | |
| | **संस्कृतसाहित्यशास्त्रेतिहासप्रश्नाः** | |
| **प्रश्नः -६** | **काव्यम् कतिविधम् ? तस्य उदाहरणेन सह सविस्तारं लिखत ।** | १० |
| | **अथवा** | |
| | **शिशुपालवधस्य महाकाव्यत्वेन समीक्षयत** | |
| **प्रश्नः -७** | **द्वयस्य परिचयः लिखन्तु ।** | १० |
| | (१) कालिदासः<br>(२) भारविः<br>(३) माघः<br>(४) दण्डी<br>(५) श्रीहर्षः | |
| **प्रश्नः -८** | **सारांशद्वयं लिखत ।** | १० |
| | (१) रघुवंशम् (२) कुमारसम्भवम् (३) मेघदूतम् (४) शाकुन्तलम् (५) किरातार्जुनीयम् | |
| **प्रश्नः -९** | **द्वयस्य टिप्पणी लेख्या** | १० |
| | (१) खण्डकाव्यम्<br>(२) चम्पूकाव्यम्<br>(३) काव्यप्रयोजनम्<br>(४) काव्यलक्षणम् | |
| **प्रश्नः -१०** | "गद्यकविनां निकषं वदन्ति" इति सविस्तरं लिखन्तु ।<br>अथवा<br>गद्यसाहित्यमहत्त्वं सविस्तरं वर्णयन्तु । | ०५ |
| **प्रश्नः -११** | **पञ्चलघुप्रश्नानां उत्तरं एकवाक्येन लिखन्तु ।** | ०५ |
| | (१) रघुवंशकाव्यम् केन रचितम् ?<br>(२) कादम्बरी केन रचिता ?<br>(३) साहित्यदर्पणस्य कर्ता के ?<br>(४) उपमा कस्य जगति प्रसिद्धा अस्ति ?<br>(५) अर्थगौरवम् कस्य प्रसिद्धम् अस्ति ?<br>(६) दण्डिनः किं वैशिष्ट्यम् अस्ति ?<br>(७) नाट्यशास्त्रस्य उत्पत्तिः केन कृता ?<br>(८) रस सम्प्रदायस्य कः प्रणेता अस्ति ? | |
| | | |

***